Gyanshauryam, International Scientific Refereed Research Journal
Available online at : www.gisrrj.com
© 2024 GISRRJ | Volume 7 | Issue 6 | ISSN : 2582-0095

# धार्मिकवास्तौ गणितानुप्रयोगविमर्शः

प्रो. अथोकथपलियालः
शोधनिर्देशकः , वास्तुशास्त्र-विभागः,
श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविश्वविद्यालयः,
नवदेहली

मुकुलः द्विवेदी
शोधच्छात्रः, वास्तुशास्त्र-विभागः,
श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविश्वविद्यालयः, नवदेहली

**Article Info**
Volume 7, Issue 6

**Page Number :** 58-73

**Publication Issue :**
November-December-2024

**Article History**
Accepted : 10 Dec 2024
Published : 20 Dec 2024

**शोधसारांशः** - एवम्प्रकारेण मन्दिरनिर्माणस्य भारतीयपद्धतिः निश्चयेनास्माकमृषीणां दिव्यचिन्तनस्य प्रतिफलमस्ति। ऋषीणां मन्दिरवास्तुविषयकदिव्यपद्धतयोऽस्माकं भारतयीयवास्तुशास्त्रे विद्यमानाः सन्ति। अत्र न कोऽपि सन्देहो यत् अद्य एभिरेव दिव्यपद्धतिभिः भारतस्य कोणे कोणे निर्मितानि दिव्यमन्दिराणि विश्वस्य कृते श्रद्धायाः शान्तेश्च केन्द्रत्वेन जातानि सन्ति।

**मुख्य शब्द-** धार्मिकः गणितानुप्रयोगः, मन्दिरनिर्माणः, भारतीयपद्धतिः,दिव्यचिन्तनः,भातरः, श्रद्धा।

वैदिकवाङ्मये वास्तुशब्दस्यार्थः गृहनिर्माणयोग्या भूमिरस्ति। वैदिककाले जनानां भवननिर्माणाय शिल्पस्य ज्ञानं नासीत्, परन्तु वैदिकसाहित्यस्य परिशीलनेनैषा धारणा निर्मूला सिद्धाभूत्। वस्तुतः तदीन्तनाः ऋषयः विद्वांसः यज्ञाय भिन्नभिन्नप्रकारकाणां कुण्डमण्डपानां वेदीनां च निर्माणं कुर्वन्ति स्म। यत्र इष्टकानां प्रयोगो भवति स्म। उपनिषत्सु वर्णितेष्वनेकेषु प्रसङ्गेष्वाश्रमेषु पर्णकुटी, यज्ञशाला, गोशाला, छात्रावासः, राजप्रासादाः, मन्दिराणि एतेषां सर्वेषां वर्णनं प्राप्यते। एतेषां निर्माणस्य प्रविधिः शुल्वसूत्रेषु कथितोऽस्ति। अतः एतत्कथनं यत् वैदिककाले जनाः भवननिर्माणप्रक्रियाया अनभिज्ञा आसन्निति भ्रान्तावधारणास्ति। एतत् कथयितुं शक्यते यत् तदानीं वास्तोः भवननिर्माणस्य च शिल्पः प्रायः प्रारम्भिकावस्थासु स्यात् यस्य विकासोऽग्रे गत्वा स्थापत्यवेदः, पुराणानि, तथा वास्तोः स्वतन्त्रग्रन्थाः इत्यादीनां रूपेषु परिलक्षितो भवति। वास्तुशास्त्रस्य प्रमुखान् त्रीन् भेदान् कर्तुं शक्यते- आवासीयवास्तुः, व्यावसायिकवास्तुः, धार्मिकवास्तुः च।

### I. धार्मिकवास्तोः भेदाः

1.पूजास्थलः- मन्दिरादीनि।

**Copyright:** © the author(s), publisher and licensee Technoscience Academy. This is an open-access article distributed under the terms of the Creative Commons Attribution Non-Commercial License, which permits unrestricted non-commercial use, distribution, and reproduction in any medium, provided the original work is properly cited

2. साधनास्थलः- आश्रमः, मठः, स्थानकम्।

3. सार्वजनिकस्थलः- धर्मशाला, विश्रामालयः इत्यादयः

4. जलाशयः- वापी, सरोवरः इत्यादयः।

5. संस्थानम्- देवपाठशाला, धर्मशालाः, आधुनिकशिक्षासंस्थानानि इत्यादयः।

भारतीयदेवप्रासादोऽत्यन्तं पवित्रकल्पना वर्तते। जगतः स्रष्टुः देवाधिदेवस्य निवासः देवालयेष्वेव मन्यते। देवमन्दिरस्य गर्भगृहमेव सृष्टेः मूलं प्राणतत्वमस्ति, तदेव हिरण्यमिति कथ्यते। अतः प्रत्येकं देवः प्राणतत्वमस्ति, तदेव हिरण्यम्। **'एकं सद्विप्राः बहुधा वदन्ति'** इत्यनुसारं सत्यस्वरूपः एक एव देवः नैकरूपेष्वभिव्यक्तो भवति। इदं मानवशरीरं तथा अस्यान्तः प्रतिष्ठितं प्राणतत्वं विश्वकर्मणः सर्वरहस्यमयी कृतिः वर्तते। देवमन्दिरस्य निर्माणमपि सर्वथास्यैवानुकृतिः वर्तते। यच्चेतः प्राणं वास्ति तदेव देवविग्रहः देवप्रतिमा वास्ति। मन्दिरं तस्य शरीरमस्ति। प्राणप्रतिष्ठायाः उपरान्तं पाषाणनिर्मितप्रतिमा देवत्वं प्राप्नोति। यता प्रत्यक्षं जगति भूमिः, अन्तरिक्षम्, द्युलोकः, एते त्रयो लोकाः सन्ति, तथैव मानवशरीरे देवमन्दिरे च त्रयाणां लोकानां परिकल्पना वर्तते। पादः पृथ्वी, मध्यभागोऽन्तरिक्षम्, शिरः द्युलोकः वर्तते। एवमेव देवमन्दिरस्य जगत्यथवा अधिष्ठानपादस्थानीयम्, गर्भगृहं मध्यस्तानीयं तथा शिखरः द्युलोकः शिरस्थानीयो भागोऽस्ति। वस्तुतः मानवदेहः, अखिलब्रह्माण्डं तथा देवालयः एतेषां त्रयाणां स्वरूपं सर्वथा परस्परं सम्बद्धं प्रतीकात्मकं चास्ति। यत् पिण्डे तत् ब्रह्माण्डेऽस्ति तथा यत् तयोः द्वयोरस्ति तस्य मूर्तरूपं देवालयोऽस्ति। अस्मिन्नेव सिद्धान्ते भारतीया वास्तुविद्या देवालयनिर्माणस्य ध्रुवकल्पनाभवत्। मन्दिरस्य गर्भगृहे यः देवविग्रहोऽस्ति सः शुद्ध-बुद्ध-मुक्तस्वभावात्मकोऽनादिरनन्तः ब्रह्मतत्त्वस्य प्रतीकोऽस्ति। वस्तुतः देवाः भूतानि च एते द्वे एव तत्वे स्तः याभ्यां सम्पूर्णस्य विश्वस्य रचनाभूत्। अस्य देवतत्त्वस्य, अमृतम्, ज्योतिः, सत्यम् इत्येतैर्युक्तं स्वरूपं वर्तते। यत्तु मूलतत्त्वं, मर्त्यम्, तमः, अनृतं च वर्तते। मानवजातेरेकैव समस्या वर्तते यत् मृत्युः, अन्धकारः, असत्यम् इत्येतेभ्यः स्वस्य रक्षणं तथा अमृतम्, ज्योतिः, सत्यम् इत्येतस्य शरणे गमनम्। एतदेव देवाराधनं देवाश्रयश्चास्ति। देवस्य शरणागतिरेव मनुष्याणामुद्धारायैकमात्रः मार्गोऽस्ति। न कोऽप्येतादृशः प्राणी वर्तते यः मृत्योस्तथान्धकारेभ्यः रक्षितो भूत्वा अमृतत्वस्य प्रकाशस्य च कामनं न करोति। अत एवन ईश्वरस्योपासना देवाराधना च श्रेयःपथोऽस्ति।

देवतत्वं मूलरूपेऽव्यक्तमस्ति। विवेकशीलव्यक्तिः ध्यानावस्थितो भूत्वात्मशक्तेः जागरणेन तस्य देवतत्वस्य साक्षात्कारं करोति। योगिजनानां ध्यानस्यैषाद्भुता शक्तिरेवानन्यप्रेमाथवा भक्तिरिति कथ्यते। भक्तेः शक्त्यैव तथा देवालये देवदर्शनेन तथा यज्ञयागाद्यनुष्ठानस्य माध्यमेन व्यक्तेः त्रिविधतापानां शमनं तथी जीवनं सुखमयं सुरक्षितं च भवति। वस्तुतः देवालयस्य निर्माणं तथा यज्ञस्यानुष्ठानम् एतयोः द्वयोः प्रतीकात्मिका समानतास्ति। यज्ञद्वारा देवतत्वस्योपासना तथा देवमन्दिरद्वारा तस्य देवतत्वस्याराधना, एतौ द्वावपि भारतीयसांस्कृतिकपरम्परायां समानौ प्रतीकौ स्तः। भारतीयवास्तुविद्यायां देवालयनिर्माणस्य देवप्रतिष्ठायाश्च सन्दर्भे विस्तारेण प्रकाशः प्रदत्तोऽस्ति।

भारतीयवर्षस्य संस्कृतौ धर्मः प्रमुखं स्थानं भजते। धार्मिकविचाराः मानवजीवनस्य कर्मणां सञ्चालनं कुर्वन्ति। मनुष्याणां जीवनदर्शनमपि तत्रैवाधारितमस्ति। पुरुषार्थे मोक्षस्य प्राप्तिं सर्वोपरि विचिन्त्य सर्वाणि कार्याणि तस्या एवोपलब्धेः

कृते क्रियन्ते। बृहदारण्यकोपनिषदि वर्णनमायाति यत् तपोयुक्तं जीवनं व्यतीतं कृत्वा ब्रह्मणि लीनस्य प्रयत्नं कुर्वन्ति, यतः संसारस्य बन्धनेभ्यः मुक्तिः प्राप्येत। यः मनुष्यः वेदान्तस्य परमज्ञानं न प्राप्नोति, सः संसारे पुनः जन्म प्राप्नोति। उपनिषत्सु विशेषतः छान्दोग्ये बृहदारण्यके च कर्मणः सिद्धान्तस्योपरि बलं प्रदत्तम्। येन व्यक्तेः जीवनस्य लक्ष्यं प्रति गमनस्यावसरस्य प्रोत्साहनस्य च प्राप्तिः भवेत्।

वैदिके युगे प्राकृतिकदेवानां पूजायाः विधानमासीत्। दार्शनिकविचारैस्सह रुद्रस्य तथा विष्णोः पूजाया उल्लेखः प्राप्यते। यजुर्वेदे रुद्रस्य वर्णनमायाति। तत् प्रकृतेः देवेन वनस्पतिना तथा पशुचारणेन सम्बद्धमासीत्। द्वितीयो देवः विष्णुः यज्ञस्य देवः मतः। अत्रैतत् कथनमप्रासङ्गिकं न भविष्यति यत् पुराणेषु विष्णोः कल्पना वेदात् स्वीकृता। वामनस्य वराहस्य चोल्लेखः ब्राह्मणग्रन्थेभ्यः प्राप्यते।

एतत् कथनमुचितं भविष्यति यत् कालान्तरे देवतानां पूजा यस्मिन् रूपे भवितुं प्रारब्धा, तत् रूपं वैदिकसाहित्ये नैव प्राप्यते किन्तु ज्ञानप्राप्त्यै मननस्य तथा देवताचिन्तनस्यावश्यकतासीत्। वैदिकदर्शने शक्तेः कृते स्थानस्याभावेऽपि देवपूजनाय स्थानं प्राप्तमस्ति। एतदेव कारणं यत् 'देवालयः' इति शब्दस्य प्रयोगः वैदिके साहित्ये प्राप्यते। यद्यपि प्राचीनभारतीयसंस्कृतौ सामूहिकधार्मिककृत्यानामभाव इवासीत् किन्तु व्यक्तिगतरूपे देवपूजनस्य प्रथा प्रचलितासीत्। समाजे देवतायाः रूपस्यालयस्य च स्थितिरज्ञाता नासीत्। वैदिकसंस्कृतौ देवपूजायै पुरोहितस्य तथा क्षत्रियाणां कृते धार्मिकस्थानानां नितान्तमावश्यकतासीत्। अत एव दैदिककालीनदेवालयं मन्दिरमिति कथनमुपयुक्तं भविष्यति। पाश्चात्यविदुषामनुमानं वर्तते यत् वेदेषु देवालयनामकसंस्थाया अभावो दृश्यते किन्तु तेषां कथने किमपि तथ्यं नास्ति। मन्दिराणां निर्माणं देवालयस्य रूपे वैदिकुयगात् पश्चात् प्रारब्धम्। महाभारते वास्तुकलायाः विशेषः परिचयः प्राप्यते। एषु भवनेषु शिल्पकलोच्चकोट्या आसीत्। इष्टदेवानां स्थानानि निश्चितान्यासन्। यानि देवस्थानानि देवायतनानि मन्दिराणि वा कथ्यन्ते स्म। सर्वेषामर्थोऽस्ति निवासस्य स्थानमिति। एतत् कथनमुचितं भवति यत् वैदिकपरम्परायां मन्दिराय स्थानं नासीदिति।

प्राचीनकाले चतुर्शशताब्देः प्रारभ्य गुप्तसम्राजां शासनं प्रारब्धं भवति। तस्मिन् युगे वैष्णवधर्मः राजधर्मस्य स्थानं स्वीकृतवान् आसीत्। अत एव भक्तिभावनया प्रेरितो भूत्वा राज्ञा प्रजया च देवतायाः स्थानस्य प्रतिष्ठापनं कृतम्। तदेव मन्दिरमिति कथ्यते। बौद्धकाले विहाराय केन्द्रीयस्थाने बुद्धप्रतिमा स्थापितुं प्रारब्धा, यत् गर्भगृहमिति कथ्यते स्म। एलौरा इत्यत्र एतादृश्यः गुहाः सन्ति यत्र बुद्धस्य प्रतिमाः स्थापिताः सन्ति।

**मन्दिराणामाध्यात्मिकभावनाः-** भारतस्य प्राचीनस्थापत्यकलासु मन्दिराणां विशिष्टं स्थानमस्ति। भारतीयसंस्कृत्या पाश्चात्यतथ्यानि सदैवात्मसात्कृतानि। भारतीयमन्दिराणि देशस्य परम्पराया उपजानि सन्ति। प्राचीनभारतस्य कलासु धर्मस्य लोकप्रियतायाः स्वरूपस्याङ्कनं दृष्टिगोचरं भवति। मन्दिरस्य वास्तुः न केवलं साधारणजनानामावासात् भिन्नोऽस्ति किन्तु गर्भगृहस्योपरि विमानस्योच्चताध्यात्मिकभावनायाः विशिष्टतायाः प्रतीकभूतास्ति। मन्दिरस्य शिखरः दूरत एव उच्चस्वरेष्वीश्वरस्य सर्वव्यापकताया उद्घोषं करोति। समीपे प्राप्ते सति मानवः भक्तौ विभोरो भविष्यति। संसारात् पृथक् भूत्वा आध्यात्मिकभावना जागरिता भवति। मन्दिरस्य भित्तिषु, स्तम्भेषु, छदिषि चोत्कीर्णाः दृश्यमानाश्चाकृतयः, तासां मध्ये दर्शकाः स्वं विस्मरन्ति। देवानां समक्षं भक्ताः नतमस्तकाः भवन्ति तथा स्वस्य कुकृत्येषु पश्चात्तापं कृत्वा निर्मलभावनायै

पवित्रभावनायै च जागरबकाः भवन्ति। मन्दिरस्य विभिन्नस्थाने, कलाकारैः पशुः, पक्षी, पुष्पलता, पौराणिकदृश्यानि, लोकप्रथाः चेत्येतेषां प्रदर्शनं कृत्वा सामाजिकं चित्रणुपस्तापितं भवति तथा तरुण्यः कामोत्तेजकप्रसङ्गाश्च इत्येतेभ्यः दुष्टानामासुरीकर्माणि प्रदर्शितानि। भक्तानां समक्षं देवानां प्रणयस्य चरित्रस्य चित्रणं मनुष्यानाद्यात्मिकतां प्रति नयति। अर्थात् मन्दिरस्य स्थापत्यं तता शिल्पः धार्मिकभावनायाः सञ्चारं कुर्वन्ति। भक्तानामेतस्याभासोऽपि न भवति यत् जीवने अनास्थायां कृतावेव कार्यसिद्धिः भविष्यतीति। भगवतः पूजनेन एव जीवने पवित्रस्रोतः प्राप्यते तथा संसारे धार्मिकसमुन्नतिः सम्भविष्यति। शिल्पिष्वात्मत्यागस्यैतावती गहना भावनासीत् यत् कुत्रापि तैरात्मोल्लेखोऽपि न विहितः। एतदेव कारणं यत् कलाकृतीनां रचयितृणां नामान्यज्ञातानि सन्ति। मन्दिराणां रचनायाः कला सांसारिकी तु नासीत्। धार्मिकभावनाभिः सहाध्यात्मिकसाधनायाः एकः मार्गः प्रशस्तः। एतानि तथ्यानि ध्यानपूर्वकं चिन्त्यन्ते चेत् ज्ञायते यत् मन्दिरं केवलं पूजागृहमेव नासीत् किन्तु सांस्कृतिकजीवनस्य केन्द्रमप्यासीत्। मन्दिराणां स्थापनया तथा निर्माणेन केवलं वातावरणमेव परिवर्तितं न भवति स्मापि तु परितः धार्मिकप्रवृत्तीनां जागरणेऽपि साहाय्यं प्राप्यते स्म। मन्दिराणि स्वस्य विशालतायाः दृढतायाश्च माध्यमेन तेषां विचाराणां स्थापनं कुर्वन्ति स्म, येषामुद्देश्यमादर्शमूल्यानां रक्षणमासीत्। यस्मिन् भूभागे मन्दिराणि निर्मितानि भवन्ति, तस्मिन् क्षेत्रे निवासिनां जनानां गतिविधिः तत्रैव केन्द्रितो भविष्यति। राजा तथा प्रजाः समीपस्थां भूमिं मन्दिराय प्रदाय धार्मिकपिपासां शान्तां कुर्वन्ति तथा स्थानीयजनेभ्यः प्रेरणापि प्राप्यते। आध्यात्मिकचिन्तनं तथा जीवनस्य मूल्यानां सार्थकतां भक्तजनाः मन्दिरे प्रवेशं कृत्वैव प्राप्तुं शक्नुवन्ति स्म।

**मन्दिरशिखरस्य स्वरूपम्-** मन्दिरेषु छदिष उपरि परितः एकेन प्रकारेण गुम्बद इत्याकारः निर्मितो भवति यत् शिखर इति कथ्यते। 'शिखरः' इति शब्दस्य मन्दिरस्य गर्भगृहस्य छदिष उपरि निर्मिताः कृतिः इति तात्पर्यमस्ति। षष्ठशताब्दितः गर्भगृहस्य समतलछदिषः उपरि नवीनाकृतिः प्रारब्धा। निर्मितिः चतसृभ्यः दिशाभ्यः सहैवारब्धा भवति। सा क्रमशः कृषा भवितुं प्रारभते, परितः उपर्याकृतेः पङ्क्तयः एकस्मिन् स्थाने मिलिताः भवन्ति। यः भारतीयवास्तुकलायां शिखर इति नाम्ना कथ्यते। अस्य बिन्दोरुपरि द्वैवाकारो भवतः। सर्वोपरि उपरिभागः कलश इति तथा अधःस्थः भागः आमूलक इति कथ्यते। एवम्प्रकारेण शिखरः उत्तरभारतस्य मन्दिरेषु प्राप्यन्ते अत एषः आर्यशिखर इति कथ्यते, भारतस्य मन्दिरेषु बहुप्रकारकाः शिखराः प्राप्यन्ते।

सर्वेषां क्षेत्राणां नामकरणेऽपि विभिन्नतागता। प्राचीनकालेऽधिकेषु भूभागेषु स्थितः पवित्रस्थलः विमानम् इति कथ्यते स्म। तस्योपरि शुण्डाकारः शिखर इति कथ्यते स्म, तत् मीनार इत्यपि कथ्यते। विमानस्यान्तः भागे इष्टदेवस्य प्रतिमा स्थापिता भवति स्म। तस्य पूर्वस्मिन् भागे एकं प्रवेशद्वारं भवति स्म। गर्भगृहस्य सम्मुखमेकः स्तम्भसहितः मण्डपः निर्मितो भवति स्म यत्र उपासकाः पूजायै एकत्रिताः भवन्ति स्म। सप्तमशताब्दितः मन्दिराणि निर्धारितस्वरूपे निर्मितानि तता शिल्पशास्त्रस्यादेशानां कलाकारैरक्षरशः पालनं विहितम्। शिल्पशास्त्रे स्थापत्यकलायाः सम्बन्धे नागरः, द्राविडः, वेसर इति त्रयाणां प्रकाराणां शिखरस्योल्लेखः प्राप्यते।

शिल्पशास्त्रे वर्णितानां शैलीनां समक्षं किमप्युदाहरणमुपस्थापितं न कर्तुं शक्यते। सर्वाणि नामानि क्षेत्रीयाधारे स्थिराण्यभवन्। प्रथमा नागरशैली उत्तरभारते प्रयुक्ता प्राप्यते। हिमालयात् विन्ध्यपर्वतमालायाः मध्यभागे नागरशिखराः द्रष्टुं प्राप्यन्ते। द्राविडरीतेः प्रयोगः द्राविडदेशेषु भवति। सर्वप्रथमं शिखरशैलीषु मन्दिराणां वर्गीकरणं कृतम्, किन्तु कालान्तरे द्वयोः

प्रकारकयोः मन्दिरयोः मापनचित्रे तथा उच्चतायां विभेदोऽभवत्। उत्तरे नागरशैल्याः तथा द्राविडे द्राविडशैल्याः पृथक् अस्पष्टरूपे तृतीयायाः वेसरशैल्या उल्लेखः प्राप्यते। यस्याः रीतेः प्रयोगः विन्ध्या तथा कृष्णा एतयोः नद्योः मध्यभागे कृतः। अस्मिन् भागे चालुक्यवंशस्य राज्यमासीत्। अतः पुरातत्ववेत्तारः तां चालुक्यशैलीमपि कथयन्ति। परन्तु एषा मिश्रिता रीतिः अधिकसमयं यावत् कार्यं कर्तुं नाशक्नोत्। अस्यां केचनावयवाः द्वाभ्यां शैलीभ्यां गृहीताः। मिश्रितत्वेन नाम वेसर इति विख्यातम्। दशमशताब्दितः भारते नागर-द्राविड-मूल्यानि गृहीत्वा मन्दिराणि निर्मितानि। वास्तुशास्त्रे वर्णनमायाति यत् नागरमन्दिराण्याधारात् सर्वोच्चांशं यावत् चतुष्कोणयुक्तानि भवन्ति। परन्तु एवम्प्रकारकाणां चतुष्कोणानामुल्लेखः सर्वेषां भवनानं सम्बन्धे प्रस्तुतं वर्तते। द्रवीडरीत्यामष्टकोणानामाकारः दृश्यते तता वेसररीत्यां गोलाकारः। एतदाधारेण तासां शैलीनां विशेषमूल्याङ्कनं नैव कर्तुं शक्यते। ईदृश्यां पिरस्थितौ पृथक् पृथक् शैल्याः प्रत्यक्षरूपं दृष्ट्वा तस्याः विशेषताः कथयितुं शक्यते।

उत्तरभारतस्य मन्दिराणां द्वे प्रमुखे लक्षणे स्तः। तेषां योजना तथा उच्चता। षष्ठशताब्देः मन्दिरेषु  मन्दिरेषु स्वस्तिकाकारयोजना सर्वत्र दृष्टा भवति। एतदतिरिच्य वक्ररेखीयोच्चतापि विशेषतः निर्मिता भवति। भारतस्योत्तरभागेष्वेताभिः विशेषताभिः सह मध्ययुगं यावत् मन्दिराणि निर्मितानि जातानि। नागरवास्तुकलायां द्वे अपि विशिष्टते दृष्टिगते भवतः। वर्गाकारयोजनायाः आरम्भे जात एव द्वयोरपि कोणयोः किञ्चित् भागः उच्चो भवति यस्मै अस्त्रम् इति नाम प्रदत्तम्। अस्याः शैल्याः प्रमुखेषु मन्दिरेषु देवगढ, झांसी, उत्तरप्रदेशः इतिस्थं दशावतारमन्दिरम्, नाचना कुठारा इतिस्थं महादेवमन्दिरं तथा भीतर गांव कानपुर इतिस्थमिष्टकानां मन्दिरम् इत्येतेषामुदाहरणमुपस्थापयितुं शक्यते। एतेषु सर्वेषु नागरार्यशिखरस्यारम्भो दृश्यते। विस्तृतसमतलछदिषः उच्चशिखराणां प्रधानता वर्तते।

द्राविडशैल्यां विमानस्योपिरभागः पिरामिड इतीव उच्चो भवति। तस्मिन् शिखराः नैकतलवन्तः भवन्ति। गर्भगृहस्य द्राविडशैल्याः शिखराणां प्रतिकृतिः प्रत्येकं तलेषु दृश्यते। एतत् बौद्धस्तूप इत्यादिभ्यः उपर्याकारस्यानुकरणं कुर्वदस्तीति प्रतीयते। तत्र गोलिकाया आकारस्य शवकक्षं भवति। एतेन एषा स्तूप्यथवा स्तूपिका इति कथ्यते। शिखराः तलस्योपरि तथा तलानां निर्मितिः, प्रत्येकमुपरिभागे केन्द्रीयशिखरस्य लग्वी स्तूपी द्राविशैल्याः विशेषता वर्तते। अस्याः शैल्याः योजनासु अन्तः वर्गाकारं गर्भगृहं विस्तृतचतुष्कोणीये निर्मान्ति स्म। चस्य छदिः प्रदक्षिणापथमाच्छादयति। बहिः भित्तिः स्तम्भैरलङ्क्रियते स्म। शिखरस्य भागः अर्धगोलाकारोऽथवा रेलयानस्य उपरिभाग इव गोलाकारः क्रियते। दक्षिणभारतस्य मन्दिरेषु रिक्तस्थानं तथा स्तम्भैर्युक्तः मण्डपः द्राविडशैल्या आवश्याङ्गान्यासन्। अस्यां शैल्यां अधस्तात् उपर्याकारः प्रोज्झितो भवति। एवम्प्रकारेण तलानन्तरं तलः भवति। यद्युत्तरभारतस्य कलाः द्राविडशैल्याः मूलभूतास्ति तर्हि सा चतुर्थशताब्देः पूर्वस्यानुकरणं मन्तुं न शक्यते। द्राविडशैल्यां विमानाकार एव केन्द्रकः निर्मीयते। यदि एतत् मन्यामहे यदुत्तरभारतादेतदागतमिति तथा तलवन्ति भवनानि द्राविडशैल्यां कार्यान्वितानि कृतानीति तदा विवादास्पदो भविष्यति यत् केन मार्गेण सा शैली दक्षिणभारते प्राप्तेति तथोत्तरभागे स आकारः त्याज्यः कथमभवत् इति। उत्तरभारतस्य विस्तृतभूभागे नागरशैल्याः वर्णनं शिल्पशास्त्रे प्राप्यते। विन्ध्यात् हिमालयपर्यन्ते भौगोलिकक्षेत्रे स्थानीयविभिन्नताया अनुमानं सरलतया कर्तुं शक्यते। स्थानीयविभेदस्यार्थो नास्ति यत् मूलस्वरूपे परिवर्तनमागतमिति, अथवा विषयस्य दृष्ट्या तस्मिन् मौलिकलक्षणानामभालो जात इति। एतदेव कारणं यत् भारतस्य प्राचीनमन्दिराणां सहैल विवरणानामुपस्थापनं कठिनमस्ति। भौगोलिकदृष्ट्या क्षेत्रीयशैली सदैल प्रभाविणी भवति।

**चतुष्षष्टिपदवास्तुः** मन्दिररचनायाः मुख्याधारः चतुष्षष्टिपदवास्तुरस्ति। एतस्मिन् चतुर्दिक्षु द्वारम्, उत्तरपूर्वभागे वास्तुपुरुषस्य शिरवति क्षेत्रे गर्भगृहं तथा दक्षिणपश्चिमभागे वास्तुपुरुषस्य पादवति क्षेत्रे गोपुरमथवा सिंहपौरः निर्मीयते।

देवताभिस्सह चतुष्षष्टिपदवास्तुचक्रः

| | | | | | | | |
|---|---|---|---|---|---|---|---|
| शिखी दितिः | पर्जन्यः | जयन्तः | इन्द्रः | सूर्यः | सत्यम् | भृशम् | अन्तरिक्षानिलः |
| अदितिः | पर्जन्यादितिः | जयन्तः | इन्द्रः | सूर्यः | सत्यम् | भृशम्, पूषा | पूषा |
| भुजङ्गः | भुजम् | आपवत्स, आपः | अर्यमा | अर्यमा | सविता सवित्रः | वितथः | वितथः |
| सोमः | सोमः | पृथ्वीधरः | ब्रह्मा | ब्रह्मा | विवस्वान् | बृहतक्षतः | बृहतक्षतः |
| भल्लाटः | भल्लाटः | पृथ्वीधरः | ब्रह्मा | ब्रह्मा | विवस्वान् | यमः | यमः |
| मुख्यः | मुख्यः | रुद्रः राजयक्ष्मा | मित्रः | मित्रः | इन्द्रः जयन्तः | गन्धर्वः | गन्धर्वः |
| नागः | नागशेषः | असुरः | वरुणः | कुसुमदन्तः | सुग्रीवः | भृंगराजः दौवारिकः | भृंगराजः |
| रोगः पापयक्ष्मा | शोषः | असुरः | अर्यमा | कुसुमदन्तः | सुग्रीवः | दौवारिकः | मृगः पितरः |

मन्दिराणां कृते ब्राह्मणी भूमिः प्रशस्ता भवति। भूम्याः घनत्वस्य शल्यस्य परीक्षा वास्तुशास्त्रीयाणां नियमानामनुसारं कर्तव्या। अतः मार्गस्य वेधस्य च विचारोऽपि सामान्यनियमेभ्य एव कर्तव्यः। मन्दिरनिर्माणाय वर्गाकारः, आयताकारः, वृत्ताकारः, अष्टभुजाकारः, षड्भुजाकारो वा भूखण्डः शुभो भवति। मन्दिरनिर्माणे सर्वप्रथमं गर्भगृहस्य स्थितिः तथा तस्य मापनं निर्धारितव्यम्। गर्भगृहस्य मानस्य समानमेव वामे दक्षिणे च कक्षेभ्यः गर्भगृहात् च चतुर्गुणितः मुख्यः मण्डपः निर्मीयते। गर्भगृहात् द्विगुणितः विस्तारः तथा चतुर्गुणिता मन्दिरस्योच्चता भवति। गर्भगृहस्य चतुर्थभागमानं द्वारं भवति। द्वारस्य माने तस्याष्टमांशस्य प्रोज्झने प्रतिमायाः मानं भवति। मन्दिरस्य विस्तारस्य गर्भगृहस्य मानस्य चानुसारं ब-हत्संहितायामन्यवास्तुग्रन्थेषु च विंशतिप्रकारकाणां मन्दिराणामुल्लेखः प्राप्यते।

| | | |
|---|---|---|
| 1.मेरुः | 2.मन्दरः | 3.कैलाशः |
| 4. विनानच्छन्दः | 5.नन्दनः | 6.समुद्रः |
| 7.पद्म | 8.गरुडः | 9.नन्दिवर्धनः |
| 10.कुज्जरः | 11.गुहराजः | 12.वृषः |
| 13.हंसः | 14.सर्वतोभद्रः | 15.घटः |
| 16.सिंहः | 17.वृत्तः | 18.चतुष्कोणः |
| 19.षोडशाश्रिः | 20. अष्टाश्रिः | |

एषा मन्दिराणां निर्माण एवं शिल्पेषु बहवः ग्रन्थाः लिखिताः सन्ति। वराहमिहिरेण स्वग्रन्थे बृहत्संहितायां मन्दिराणां सञ्ज्ञा प्रासादानां वर्तते, अतः तैः प्रत्येकं सह प्रासादशब्दः योजितः। एतेषां विंशतेः प्रासादानां वर्णनमेतस्मिन् क्रमे बृहत्संहितायामुपलब्धं भवति। यथा–

1.**मेरुप्रासादः**- अस्मिन् प्रासादे षट्कोणाः, बहिः भूमिः, नैकप्रकारकाणि वातायनानि, चतुर्दिक्षु द्वाराणि तथा विस्तारे द्वात्रिंशत् हस्ताः भवन्ति।

2. **मन्दरप्रासादः**- अयं प्रासादः षट्कोणाः, त्रिंशत्हस्तपरिमितः विस्तारः, दश भूमयः, नैके शिखराः इत्येतद्वान् भवति।

3.**कैलाशप्रासादः**- अयं प्रासादः षट्कोणाः, अष्ट भूमयः, अष्टाविंशतिहस्तविस्तारः, विभिन्नाः शिखराः, इत्येतद्वान् भवति।

4.**विमानप्रासादः**- प्रासादोऽयं नैकप्रकारकछिद्रवत्वातायनानि, एकविंशतिहस्तविस्तारः, षट् कोणाः, अष्ट भूमयः, इत्येतद्वान् भवति।

5.**नन्दनप्रासादः**- प्रासादोऽयं षट् कोणाः षड् भूमयः, द्वात्रिंशद्धस्तविस्तारः, इत्येतद्वान् भवति।

6.**समुद्रप्रासादः**- प्रासादोऽयं एकभूमिवान्, आकारे गोलस्तथा शृङ्गयुक्तो भवति।

7.**हंसप्रासादः**- प्रासादोऽयं हंसपक्षिण आकारवान्, द्वादशहस्तविस्तारवान्, एकभूमिवान्, एकशृङ्गवान् च भवति।

8. **घटप्रासादः**- प्रासादोऽयं घटस्येवाकारवान्, अष्टहस्तविस्तारवान्, एकशृङ्गवान्, एकभूमिवान् च भवति।

9. **सर्वतोभद्रप्रासादः**- प्रासादोऽयं चतुर्षु दिशासु द्वारैर्युक्तः, नैकशिखरवान्, नैकचन्द्रशालावान्, षड्विंशतिहस्तविस्तारवान्, चतुष्कोणवान्, पञ्चभूमिवान् च भवति।

10.**सिंहप्रासादः**- प्रासादोऽयं प्रमुखे द्वारे सिंहस्य बृहत्प्रतिमाभिः युक्तः, द्वादशकोणवान्, अष्टहस्तविस्तारवान्, एकभूमिवान्, सामान्यशिखरवान् च भवति।

11. **वृत्तप्रासादः**- अस्य प्रासादस्याकारः एकस्य वृत्तस्येव भवति। अस्मिन् प्रासादे अन्तः प्रकाशः न्यूनः भवति। एषः अष्टहस्तविस्तारवान् तथैकभूमिवान् भवति।

12. **चतुष्कोणप्रासादः**- प्रासादोऽयं चतुष्कोणवान् भवति। न्यूनप्रकाशेन युक्तश्च भवति।

13.**पद्मप्रासादः**- प्रासादोऽयमेकभूमिवान्, पद्माकारवान्, एकशृङ्गवान् च भवति।

14. **गरुडप्रासादः**- प्रासादोऽयं शीर्षात् गरुडस्येवाकारवान् भवति। अस्मिन् चतुर्विंशतिहस्तविस्तारः, चतुर्विंशतिशिखराः, सप्त भूमयश्च भवन्ति।

15. **नन्दिवर्धनप्रासादः**- प्रासादोऽयं गरुडस्याकारवान् भवति किन्त्वस्मिन् पुच्छः बर्हाश्च न भवन्ति। एतस्मिन् सप्त भूमयः, चतुर्विंशतिहस्तविस्तारः, चतुर्विंशतिः शिखराः, षट् कोणाः भवन्ति।

16. **कुञ्जरप्रासादः**- प्रासादोऽयं गजपृष्ठसदृशः, षोडशहस्तविस्तारवान्, एकभूमिवान्, तथा त्रिचन्द्रशालाभिः युक्तो भवति।

17. **गुहराजप्रासादः**- प्रासादोऽयं गुहस्येवाकारवान्, षोडशहस्तविस्तारवान्, त्रिचन्द्रशालाभिर्युक्तो भवति। एषः गुहा इव दृश्यते। भगवतः कार्तिकेयस्य नामापि गुहाराजोऽस्ति।

18. **वृषप्रासादः**- प्रासादोऽयमेकभूमिवान्, एकशृङ्गवान्, द्वादशहस्तविस्तारवान् तथा परितः वृत्ताकारवान् भवति।

19. **षोडशाश्रिप्रासादः-** प्रासादोऽयं षोडशकोणवान् भवति। एतस्मिन् अन्तःप्रकाशः न्यूनं भवति। एकभूमिवान् तथा अष्टहस्तविस्तारवान् भवति।

20. **अष्टाश्रिप्रासादः-** प्रासादोऽयमष्टकोणवान् भवति। अयमपि न्यूनप्रकाशयुक्तो भवति। एकभूमिवान् तथा अष्टहस्तविस्तारेण सह सामान्यशिखरेण सुशोभितो भवति।

**मन्दिरनिर्माणविधिः-** मन्दिरस्य यावान् विस्तारः स्यात् तस्मात् द्विगुणितेच्चता तथोच्चतायाः तृतीयांशवती कटिः भवति। सोपानानामुपरि यत्र देवालयस्य प्रारम्भो भवति सा कटिरिति कथ्यते। विस्तारस्यार्धं गर्भः, शेषासु दिशासु भित्तयो भवन्ति। गर्भस्य चतुर्थांशेन तुल्या द्वारस्य विस्तृतिः भवति तथा विस्तारस्य द्विगुणिता द्वारस्योच्चता भवति। द्वारस्योच्चतायाः चतुर्थांशेन तुल्या शाखा, तस्याः भुजा तथा उदुम्बरस्य विस्तारः भवति। शाखायाः विस्तारेण तुल्यान्यशाखानां स्थूलता भवति। शाखानां विस्तारस्य मध्ये तिस्रः, पञ्च, सप्त, नव वा शाखाः, एतासां भवनेन द्वारं श्रेष्ठं भवति। द्वयोः शाखयोरधः विस्तारे द्वयोः प्रतिहारिणोः मूर्तिः खनितव्या। शाकानां त्रिचतुर्थभागाः हंसादिभिः शुभपक्षिभिः, बिल्वम्, स्वस्तिकम्, कलशः, स्त्रिपुरषयोः युगलः, पर्णानि, लताः इत्यादिभिश्च सुशोभितः कर्तव्यः। द्वारस्योच्चतायाः अष्टमांशान् न्यूनान् कृत्वा यत् शिष्येत तावत् देवप्रतिमापिण्डिकासहितं भवितव्यम्। एतस्मात् भागद्वयं प्रतिमायास्तथैकभागः पिण्डकायाः भवितव्यः। अतः कथयितुं शक्यते यत् मन्दिरनिर्माणस्य सम्बन्धः मिथोऽन्योऽन्याश्रितो भवतीति। विस्तारेण प्रतिमायास्तथा प्रतिमायाः विस्तारस्य ज्ञानं भवितुं शक्नोति।

मन्दिराणि देवतानां निवासगृहाणि भवन्त्यतः साधारणजनानामावासीयभवनानामपेक्षया मन्दिरेषु सौन्दर्ये तथा तेषां दृढतायां विशेषध्यानदानमावश्यकं मन्यते, येन तानि चिरस्थायिनि भवेयुः। इसलिए मन्दिरनिर्माणे इष्टका, पाषाणाः, धातवः, रत्नानि इत्येतेषामुपयोगः पुण्यफलप्रदायकः कथ्यते। मन्दिरनिर्माणे भूखण्डस्य पश्चिमे रथशाला, मठः, धर्मगुरोः स्थानम्, उत्तरे रथस्य प्रवेशद्वारं निर्मातव्यानि। मन्दिरं यस्मिन्नाकारे स्यात् तदाकरस्यैव जगत्यर्तादधिष्ठानं निर्मातव्यम्। यतः एतदेव देवालयस्यासनरूपं भवति। मुख्यदेवमन्दिरस्याग्रे पृष्ठे वामे दक्षिणे च अन्यानि मन्दिराणि निर्मातव्यानि, तेषां सर्वेषां निर्माणमेवं स्यात् येन मुख्यमन्दिरस्य गर्भगृहे हानिः न स्यात्। शिवलिङ्गस्य पूजायै कस्याप्यसन्य देवस्य स्थापना नैव कर्तव्या, यतः यथा सूर्यस्य तेजसान्ये, तारकाणां तेजः नष्टं भवति तथैवान्यदेवतानां प्रभा नष्टा भवति। येन ते देवाः भोगादीः सुखसम्पत्तीः दातुं नैव शक्नुवन्ति। मन्दिरे शिवस्य सम्मुखं शिवः, ब्रह्मणः सम्मुखं ब्रह्मा, विष्णोः सम्मुखे विष्णुः, सूर्यस्य सम्मुखे सूर्यः, एवं परस्परं स्वजातीयदेवानां स्थापनेन दोषो न भवति।

चण्डिकादीनां देवीमन्दिराणां सम्मुखं मातृदेवता, यक्षः, क्षेत्रपालः, भैरव इत्यादीनां स्थापनेन दोषो न भवति, यतः एते परस्परं हितैषिणः सन्ति। ब्रह्मा, विष्णुः, एतौ द्वौ देवा एकस्यां नाभ्यां भवेयुरर्थात् तयोः देवालये परस्परं सम्मुखं स्युः तदापि दोषो न भवति। भगवतः शिवस्य समक्षमन्यदेवस्य दृष्टिवेधो भवति, येन महान् भय उत्पद्यते। शिवालयाः अन्यदेवानामालयाश्च, एतयोः मध्ये प्रसिद्धः राजमार्गः स्यात्, अथवा भित्तिः स्यात् तदा दोषो न भवति। शिवस्य स्नानोदकं गुप्तमार्गेण चण्डगणस्य मुखे पत्त्। एवम्प्रकारेण स्नानस्य चलस्य निकासाय गुप्तनालस्य निर्माणं कर्तव्यम्। शिवस्नानस्य चलं यया नाल्या वहेत् तस्या उपरि किमप्याच्छादकं स्यात्, दृश्यमानस्य स्नानजलस्योल्लङ्घनं न कर्तव्यम्। स्नानजलस्योल्लह्घनेन पूर्वार्जितपुण्यानां नाशो भवति। पूर्वाभिमुखद्वार-पश्चिमाभिमुखद्वारवति देवालये जलस्य निकासाय नाली उत्तरदिशायां स्थापितव्या। शिवलिङ्गस्य कृतेऽयं नियमः विशेषरूपेण प्रशंसनीयोऽस्ति। मण्डपे ये देवाः स्थापिताः स्युः तेषां स्नानजलस्य निकासाय नाली वामे दक्षिणे

वा कर्तव्या, अर्थात् मुख्यदेवस्य वामतः तथा स्थापितदेवानां स्नानोदकस्य निकासाय वामे दक्षिणे कर्तव्या। जगत्याः अधिष्ठानस्य वा परितः नालीं निर्मीय निकासम् उत्तरदिशि कुर्यात्।

**पूर्वपश्चाभिमुखदेवः-** ब्रह्मा, विष्णुः, शिवः, सूर्यः, इन्द्रः, कार्तिकेयः एते देवाः पूर्वपश्चिमाभिमुखाः भवन्ति। एते, मुखं दक्षिणे उत्तरे च न स्यात्। अतः एता एवं स्थापितव्याः यत् एतेषां मुखं पूर्वपश्चिमं प्रति स्यात्। नगरस्य मध्ये तथा बहिः स्थापितानां देवानां मुखं नगरस्य सम्मुखे स्थापनं शुभं भवति। गणेशः, कुबेरः, तथा माता लक्ष्मी एतासां नगरस्य द्वारे वास्तोरनुसारं स्थापन सुखदायकं भवति।

**दक्षिणाभिमुखदेवाः-** गणेशः, भैरवः, चण्डी, नवग्रहः, मातृदेवता, कुबेरः एते देवाः दक्षिणाभिमुखा स्थापितव्याः तदा शुभफलदातारः भविष्यन्ति।

**विदिशाभिमुखदेवाः-** वानरेश्वरस्य पवनतनयस्य हनुमतः मुखं नैर्ऋत्ये विदिशाभिमुखे भवेत्, तदा शुभं भवति। शेषाणां देवानां मुखं नैर्ऋत्यादिषु विदिशासु कदापि न कर्तव्यम्।

**सूर्यायतनानि-** सूर्यस्य पञ्चायतनदेवेषु मध्ये सूर्यः, तस्य प्रदक्षिणायां क्रमशः गणेशः, विष्णुः, चण्डी, शिवः इत्येते स्थापितव्याः तथा नवग्रहस्य मूर्तयोऽपि स्थापितव्याः।

**गणेशायतनानि-** गणेशस्य पञ्चायतनदेवानां मध्ये गणेशः, तत्पश्चात् प्रदक्षिणाक्रमेण चण्डी देवा, महादेवः, विष्णुः, सूर्यः इत्येतेषां स्थापनां कुर्यात् तथा द्वादशगणानां मूर्तयोऽपि स्थापितव्याः। एतत् श्रेयस्करं भवति।

**विष्णवायतनम्-** विष्णोः पञ्चायतनदेवेषु मध्ये विष्णोः स्थापना, तदनु प्रदक्षिणाक्रमेण गणेशः, सूर्यः, अम्बिका, शिवः इत्येते स्थापितव्याः। गोपीनां तथान्येषामवताराणां मूर्तयो, द्वारिकानगरी च स्थापितव्याः।

**शिवायतनम्-** शिवस्य पञ्चायतनदेवेषु मध्ये शिवः, तत्पश्चात् प्रदक्षिणाक्रमेण सूर्यः, गणेशः, चण्डी, विष्णुरित्येते स्थापितव्याः।

**त्रिदेवस्थापना-** त्रिपुरुषमन्दिरे शिवस्य स्थापनां मध्यभागे कुर्यात्। तस्य वामे विष्णुस्तथा दक्षिमे ब्रह्मा स्थपितव्यौ। एतद्विपरीतं स्थापनं भयदायकं भवति।

त्रिपुरुषमन्दिरे ब्ह्मा, विष्णुः, शिवः, एतेषां त्रयाणां देवानामेकस्मिन्नेव गर्भगृहेऽथवा पृथक् गर्भगृहे स्थापना करणीया चेत् शिवात् न्यूनः विष्णुः, विष्णोः न्यूनः ब्रह्मा एवमुच्चता कर्तव्या। शिवमुखस्य तृतीयभागं न्यूनं कृत्वा विष्णोरुच्चता तथा विष्णोः मुखार्धभागं यावत् ब्रह्मण उच्चता विधातव्या। ब्रह्मण उच्चताया समानं मातुः पार्वत्या उच्चता स्यात्। एतदनुसारं देवानां माने स्थापितेऽभीप्सितफलस्य प्राप्तिः भवति।

**देववाहनस्थापना-** देवानां वाहनानां स्थापनस्थाने फलकं स्थापयेत्। तत् फलकं देवतायाः सम्मुखं मन्दिरात् एकम्, द्वे, त्रीणि, चत्वारि, पञ्च, षट्, सप्त वा पादाः यावत् दूरे निर्मातुं शक्यते। मूर्तेरुदयमानस्य नव भागान् कुर्यात्, ततः पञ्च, षट्, सप्त वैतेषां भागानां हवनं कुर्यात्। अथवा गुहा, नाभिः, स्तनम् इति पर्यन्तवाहनानुदयमानान् कुर्यात्। एतत् त्रिप्रकारकाणां वाहनानां मानं कथितमस्ति। वाहनस्य दृष्टिः देवमूर्तेः चरणौ, जानुनी, कटिः एतत्पर्यन्तमेव स्यात्।

**परिक्रमा-** यज्ञस्यानुष्ठाने तथा मन्दिरस्य विधाने न तथान्तरमस्ति। यथा यज्ञः भुवनत्रयस्या नाभ्याभिहितो भवति तथा यज्ञाग्निः यया वेद्या प्रज्वलितो भवति सा वेदी भूमण्डलस्य केन्द्रः मन्यते स्म। तथैव देवमन्दिरस्य रूपे समष्टिः विश्वव्यष्ट्यै मूर्ता भवति तथा यः समष्टेः सहस्रशीर्षा पुरुषोऽस्ति सः व्यष्ट्यै देवविग्रहाणां रूपे मूर्तो भवति। अतः देवमन्दिरेषु या मूर्तविग्रहाणां प्रदक्षिणा परिक्रमा वा क्रियते तस्या अभिप्रायोऽस्ति यत् वयमस्मान् तस्य दव्यप्रभावस्य क्षेत्रे लीनान् कुर्मः यत् देव इत्यथवा मूर्तविग्रहस्य महती शक्तिरथवा प्राणशक्तेः महिमा इति कथ्यते। अङ्गप्रत्यङ्गैः खण्डितां मूर्तिं मन्दिरे स्थापयित्वा पूजा न कर्तव्या। विद्वद्भिः कर्तव्यं यत् भग्नमूर्तेः विसर्जनं स्यात्।

**एकत्रदेवपूजानिषेधः-** गृहे सहैव द्वौ शिवलिङ्गौ, त्रयः गणेशाः, तिस्रः शक्तयः, द्वौ चक्रधारिणौ नारायणौ, द्वौ शालग्रामौ तथा द्वौ शङ्खौ इत्येतेषां पूजा नैव कर्तव्या। एतेषां पूजनेन गृहस्वामिनः मानसिकपीडा तथोद्वेगो भवति।

**मन्दिरे पूर्यप्रतिमायाः मानम्-** मन्दिरे किम्मानस्य प्रतिमायाः पूजा कर्तव्या? इति सन्दर्भे मत्स्यपुराणे रूपमण्डने च कथितमस्ति। द्वादशाङ्गुवप्रतिमाया आरभ्य नवहस्तोच्चतां यावत् प्रतिमा मन्दिरेषु पूजाया योग्या भवति। दशहस्तादुच्चा प्रतिमा मन्दिरेण विनापि पूजयितुं शक्यते। दशहस्तात् षट्त्रिंशद्धस्तोच्चतां यावत् प्रतिमा पृथक् पृथक् रूपे स्थापयितुं शक्यते किन्तु षट्त्रिंशद्धस्तात् पञ्चचत्वारिंशद्धस्तोच्चतावती प्रतिमा फलके स्थापयित्वैव पूजितव्या भवति।

देवानां स्थापनया दर्शनेन च मनुष्याणां समस्तानां पापानां नाशो भवति। पूजया धर्मवृद्धिः तथार्थ-काम-मोक्षाणां प्राप्तिः भवति।

II. **धार्मिकवास्तौ गणितस्य भूमिका-** मन्दिरमस्माकमास्थायाः केन्द्रं वर्तते तथा सूत्रधाराणां श्रेष्ठं सृजनम्। आत्मधारिणां मानवानां पक्षतः परमात्मा शक्तेः प्रतिष्ठायाः परमाधारः वर्तते। मन्दिरैः शिल्पकला स्थापत्यकला च महत्वपूर्णा प्रमाणिता। मन्दिराणि स्वस्मिन् परकीये चार्थे स्वयंसिद्धस्थलानीत्यस्मिन्नर्थे स्वीकर्तुं शक्यन्ते। एतादृशेषु स्थलेषु मनोरथाः सिद्धाः भवन्ति। आदौ जलाशयस्य पुष्पालयस्य च मध्ये देवालयस्य निर्माणे यशसः धर्मस्य चाभिवृद्धिः मता, यथा बौद्धकाले स्तूपादीनां निर्माणेन सहायं विचारः युक्तोऽस्ति। वराहमिहिरेणापि कथितमस्ति।

देवालयानां विकासकालेऽन्येऽपि हेतवः समक्षमागताः। यथा-

1. शासकैः सामन्तैः श्रेष्ठिभिश्च वैभवः प्रतिष्ठा च प्राप्यते।
2. शिल्पिभिः सूत्रधारैश्च स्वस्य कलायाः प्रदर्शनस्यावसरः प्राप्यते तता एतस्य फलस्वरूपं तैः सम्मानमग्रहारादयस्य प्राप्यन्ते।
3. अर्चकैश्च अर्चनस्य फलस्वरूपं शासनाधिकारः आजीविका च प्राप्यते।
4. लघुबृहद्व्यापारिभिश्च लाभः प्राप्यते- पुष्पाणि, मालाः, प्रसादः, सुगन्धिततैलम्, वस्त्राणि, ध्वजः, चन्दनम्, घण्टा, धूमपात्रम् इत्यादीनां विक्रयेण व्यापारः वृद्धिं गच्छति।
5. जनसामान्याः इच्छापूर्तये दानादीनां फलस्वरूपं विशिष्टोपलब्धेः प्राप्तेः विश्वासः फलीभूतो भवति।

एतदतिरिच्य कीर्तनकाराणाम्, कथावाचकानाम्, नर्तकानाम्, दासदासीनाम्, रथवताम्, पाचकानाम्, कुम्भकाराणाम्, विपणकानाम्, कलाकाराणाम् अन्येषां चाजीविकाया आधारभूतानि मन्दिराण्यासन्। एतानि पोषणकेन्द्रस्य रूपेऽपि विकासशीलान्यासन्। किन्त्वेतेषां मूलं प्रतीकात्मकपूजायाः महत्वस्य प्रतिष्ठायाः भावो विद्यमानः अवर्तत।

मन्दिराणि यज्ञसंस्थाया उत्तरकाले देवत्वस्य ईश्वरीकरणस्य ध्यानप्रक्रियायाश्च मूर्तिमत्भवनस्य विकासयात्रायामनेकानि सोपानानि गृहीतान्यपि सन्ति। मम दृष्ट्या मन्दिराण्यास्थायाः सुदृढाधारभूतान्यस्मिन्नर्थेऽपि भवन्ति यत् जनेन यज्ञयागादीनां कठिनमार्गस्यापेक्षया मन्दिरेषु सहजतया ईश्वरीयस्य सान्निध्यस्य प्राप्तेः प्रयासः विहितः। एतानि तस्यै भक्त्यै नवीनार्थप्रदातृत्वेन केन्दाः अवर्तन्त यानि शब्दतः विभाजनेन प्रेरितान्यासन्।

**इष्टापूर्तकर्मसु परिगणितानि प्रासादकार्याणि-** पुराणेष्वागमेषु च मन्दिराणां माहात्म्यमतिशयरूपेण प्राप्यते तथा तानि भवसागरात् तारणस्य हेतुत्वेनापि कथितानि। ब्राह्मणग्रन्थेषु, श्रौत्र स्मार्तवाङ्मये, स्मृतिषु च येषामिष्टापूर्तकर्मणां बृहती चर्चाभूत् तथा एभिः कर्मभिः येषां लोकानां प्राप्तेः विश्वासोऽक्रियत, त एव विश्वासाः मन्दिरस्य निर्माणस्य फलत्वेनापि स्थिरीकृताः। मान्यतेयं सा प्रचीनमान्यता इव समाजे वर्धन्ती गता। इयमेव मान्यता काश्यपसंहिताकारेणाप्युद्धृतास्ति।

प्रारम्भिकोपपुराणेषु मन्दिरनिर्माणस्यैव नापि तु मार्जनम्, उपलेपनम्, चित्रांकनम् इत्यादीनां कार्याणामपि प्रशंसा प्राप्यते।

उत्तरभारतस्य प्रसङ्गे गुर्जर-प्रतिहार-गुहिल-चन्देल-राष्ट्रकूट-परमार-चालुक्य-सोलंकी-पालादीनां राजवंशानां कालेऽपि नैकानि मन्दिराणि निर्मितानि चेत् दक्षिणप्रदेशे चोल-चालुक्यादीनां राजवंशेभ्यः मन्दिराणां निर्माणस्य श्रेयः प्रदातुं शक्यते, येषामभिलेखेषु देवालयानां सम्बन्धे नैके उल्लेखाः प्राप्यते।

मन्दिरं यद्याधारे चक्रसहितं वर्तते चेत् यानं विमानं वा कथ्यते। दक्षिणे तस्य पर्यायः रथोऽपि प्राप्यते। तत् देवैः सहितत्वात् अथवा देवानामालयत्वाच्च देवालयः, देवगृहम्, देवसद्म इति कथ्यते। यत्र यत्र यत् दुर्लभमासीत् तस्य तस्य चित्ररूपेण मूर्तफलरूपेण प्रदर्शनस्य प्रयासः मन्दिरादिषु विहितः। मन्दिराणामाकर्षकत्वनिर्माणे दिव्यातिदिव्यनिर्माणे च इदमेव कारणमासीत् यत् अधिकाधिकं जनाः पश्येयुरिति। अस्मिन् प्रयासे जनजीवनस्य गतिविधिभ्यः आहत्य देवीदेवतानां लीलावतारपर्यन्तानां नैकरूपेण प्रदर्शनस्य प्रयासो विहितोऽस्ति। आदौ माङ्गलिकः पक्षिणः, श्रीवृक्षाः, स्वस्तिकम्, घटाः, मिथुनाकृतयः, पत्रवल्ली, प्रमथगणाः इत्यादिभिः प्रासादाः शोभिताः क्रियन्ते स्म। एतानि मङ्गलचिह्नानि वर्धमानानि 108सङ्ख्याकानि जातानि।

एतेषां चिह्नानां महिमा महाभारतस्य शान्तिपर्वणि, द्रोणपर्वणि, गोपालतापनीयोपनिषद्, तिलोयपणत्तिनामके जैनग्रन्थे, सुश्रुतसंहितायाः सूत्रस्थानादिषु च प्राप्यते। एतस्याशयोऽस्ति यत् मांगलिकचिह्नेषु बहुप्राचीनकालादेव विचारः प्रारब्ध आसीत्।

**गणितस्य भूमिका-** मन्दिराणां निर्माणं किमर्थं तथा कथमभवत् इति कथनस्यावश्यकता नास्ति। आगमेषु वास्तुग्रन्थेषु च समुद्रमन्थनम्, कल्पवृक्षस्य फलनं तथा देवाराधनाय निर्मितानि द्रव्याणि, प्रासादाकारस्य दानं कृत्वा पूजा एवम्प्रकारकेषु प्रसङ्गेषु मन्दिराणां तथा तदङ्गानामुत्पत्तेराख्यानानि लिखितानि सन्ति। जयपृच्छा, अपराजितपृच्छा, प्रासादमण्डनम्, वास्तुमञ्जरी, क्षीरार्णवः, प्रासादतिलकम्, शिल्पप्रकाश इत्यादिष्वनेकेषु मध्यकालीनग्रन्थेष्वेतेषां प्रसङ्गानां परिणतिः प्राप्यते।

बृहत्संहिता, काश्यपसंहिता तथा विश्वकर्मसंहिता इत्यादिषु मन्दिराणां साक्षात् रूपाणां चर्चा विहितास्ति। अस्माभिः स्मर्तव्यं भवति यत् मन्दिराणां नामानि प्रप्रथमं वराहमिहिरेण प्रदत्तानि। स्वीकारोक्तिरपि वर्तते। एतेन स्पष्टमस्ति यत् 587 तमे वर्षे अस्मदीये स्थाने विंशतिप्रकारकाणां मन्दिराणां प्रचलनं प्रारब्धमासीत्। एवम्प्रकारिकी चर्चापि उत्तरभारते तत्रापि मध्यप्रान्तेष्वधिकं प्राप्यते। इयं पूर्वमध्यकाले मन्दिराणां वर्धतां प्रभावाणां फलश्रुतिः वर्तते। एभ्यः प्रासादेभ्य एव नैकेषां प्रकाराणां विकासोऽभवत्। यान् प्रति संकेतोऽस्माभिः न केवलं गरूडपुराणम्, लिंगपुराणम्, अग्निपुराणम् एभ्य एव प्राप्यते किन्तु समराङ्गणसूत्रधारेऽपि सर्वाधिकसंङ्ख्या प्राप्यते। धाराधिपभोजद्रेवेनापि प्रासादविंशिका इति नाम्ना देवतानां कृते उपयोगिमन्दिराणां नामादीनि लिखितानि।

मेर्वादिमन्दिराणां परिचयोऽस्मभ्यं बृहत्संहितायाः काश्यपसंहितायाश्य एवम्प्रकारेण प्राप्यते। –

1. **मेरुमन्दिरम्-** 6 कोणाः, 12 तलाः, तत्र विचित्राणि चित्राणि, छिद्राः, वातायनानि, चतुर्दिक्षु द्वाराणि तथा 32 हस्तमितः विस्तारः।
2. **मन्दरमन्दिरम् –** 6 कोणाः, 30 हस्तमितः विस्तारः, 10 तलानि तथा षट्कोणीयशिखरयुक्तम्।
3. **कैलासमन्दिरम्-** 28 हस्तमितः विस्तारः, 8 तलाः, 6 कोणाः, षट्कोणीयः शिखरः।
4. **विमानमन्दिरम्-** जालः, गवाक्षयुतम्, 21 हस्तमितः विस्तारः, षट्कोणीयशिखरादीनां रचना।
5. **नन्दनमन्दिरम्-** 6 कोणाः, 6 तलाः, 32 हस्तमितः विस्तारः, 16 अण्डकवान् शिखरः।
6. **समुद्रगमन्दिरम्-** वर्तुलाकारः, 8 हस्तमितः विस्तारः, 1 तलः, एकशृङ्गवान् शिखरः।
7. **पद्ममन्दिरम्-** कमलस्याकृतिः, 8 हस्ताः, 1 तलः, एकशृङ्गवान्।
8. **गरुडमन्दिरम्-** 24 हस्ताः, 7 भूमिः, 20 अण्डकाः, बाजस्याकृतिवत् बर्हपुच्छाभ्यां सह।
9. **नन्दिवर्धनमन्दिरम्-** 7 भूमिः, 24 हस्ताः, 20 अण्डकाः, बाजस्याकृतिवत् बर्हपुच्छाभ्यां विना।
10. **कुञ्जनमन्दिरम्-** हस्तिनः पृष्ठ इव आकृतिवत्, मूलात् परितः 16 हस्तमितः विस्तारः, 3 चन्द्रशालायाः वलभीवत्, 10 हस्तमितोच्चता।
11. **गुहराजमन्दिरम्-** गुहाया आकृतिः, 16 हस्तमितः विस्तारः, चन्द्रशालायाः वलभ्याः रचना, सम्यक् लक्षणानि, 11 हस्तमितोच्चता।
12. **वृषमन्दिरम्-** एका भूमिः, एकः शृङ्गः, 12 हस्तमितः विस्तारः, परिताः वृत्ताकारः।
13. **हंसमन्दिरम्-** हंसपक्षिण इवाकृतिः, 12 हस्तमितः विस्तारः, एका भूमिका, बर्हपुच्छाभ्यामलङ्कृतम्।
14. **घटमन्दिरम्-** कलशरूपम्, 8 हस्तमितः विस्तारः, एकशृङ्गवत् तथा एकभूमिवत्।
15. **सर्वतोभद्रमन्दिरम्-** चतुर्दिक्षु द्वाराणि, नैके शिखराः, नैकाः सुन्दरचन्द्रशालाः, 26 हस्तमितः विस्तारः, चत्वारः कोणाः, 5 तलवत्।

16. **सिंहमन्दिरम्-** सिंहस्य प्रतिमाभि: शोभितम्, 12 कोणा:, 8 हस्तमित: विस्तार:।

17. **वृत्तमन्दिरम्-** गोलाकार: पञ्चकोणश्च, एका भूमिका, अञ्जनरूपम्, एकाण्डकवत्, सान्धकार:।

18. **चतुष्कोणमन्दिरम्-** चतुष्कोण:, एका भूमिका, अञ्जनरूपम्, एकाण्डकम्, सान्धकार:।

19. **अष्टाश्रिमन्दिरम्-** अष्टकोणवत्, एकया भूम्या युक्तम्, एकाण्डरूपम्, सान्धकार:।

एषु मन्दिरेषु यत् भूमिकाया: तलस्य च प्रमाणं प्राप्तम्, तस्य द्वे मते प्राप्यते–

1. मयोक्तम्– 108 अङ्गुलानि– एक: तल:।
2. विश्वकर्मोक्तम्– अर्धाधिकत्रिहस्तम्– एक: तल:।

इदमपि मतमस्ति यत् विश्वकर्मण: प्रमाणं कपोतपालिकां परित्यज्य कथितं यत् यद् कपोतपालिका, या 24 अङ्गुलस्य समाना भवति, सा यदि योज्यते तर्हि मयस्य विश्वकर्मण: भूमिकाया: प्रमाणं समानमेव भविष्यति।

एतस्याशयोऽस्ति यत् कपोतपालिकया हीनं मानं 44 अङ्गुलं भवति तथा भूमिकया सह स्यात्तर्हि 108 अङ्गुलं प्रमाणं भविष्यति। इदमङ्गुलमानं भूमिकाया: समानतया कथितमस्ति।

'क्षीरार्णव:' इत्यत्र प्रासादस्य रचना देवानं शरीररूपा इति मता। मूलस्य शिला पदस्य रूपे, गर्भगृहमुदरम्, मूलं जङ्घा, स्तम्भ: जानु, घण्टा जिह्वा, दीपकं प्राणम्, प्रणाल: गुदा, देवस्य ब्रह्मस्थानं नाभि:, पीठिका हृदयम्, प्रतिमा पुरुष:, पादौ अहङ्कार:, ज्योति: चक्षु:, मन्दिरस्योपरि भाग: तस्य प्रकृति:, प्रतिमा आत्मा, द्वारस्य कुम्भीतलस्य निम्नभागा: लिङ्गम्, शिखरस्य शुकनास: नासिका, गवाक्ष: कर्ण:, शिखरस्य स्कन्ध: स्तम्भ: तता आमलसारस्य कण्ठ: कठ:, कलशस्य मस्तकं भित्ते: लेपनादीनि मज्जादिरूपम् एवम्प्रकारेण तद्रूपाणि चिन्तितव्यानि।

## III. धार्मिकवास्तौ गणितानुप्रयोग:

**पीठोदयमानम्-** पीठोदयमानसन्दर्भे परम्परेयं वर्तते यत् एकहस्तस्य,द्विहस्तस्य, त्रिहस्तस्य, चतुर्हस्तस्य, पञ्चहस्तस्य विस्तारयुतप्रासादाय यथासङ्ख्यम् उदयमानं
द्वादशाङ्गुलकम्,षोडशाङ्गुलकम्,अष्टादशाङ्गुलकम्,सार्धसप्तविंशत्यङ्गुलकमथवा तृतीयं भागमथ च त्रिंशदङ्गुलम् अथवा चतुर्थभागं स्थापयेत

पूर्वोक्तप्रकारेण षड् हस्ताद् दशहस्तात्मकाय प्रासादाय पीठोदयं प्रत्येकं हस्ते चतुरङ्गुलकम्, एकादशहस्तत: विंशतिहस्तविस्तृतस्य प्रासादस्य पीठोदयं प्रत्येकं हस्ते त्र्यङ्गुलात्मकं, एकविंशतिहस्तत: षट्त्रिंशद्धस्तविस्तृतस्य पीठोदयं प्रत्येकं हस्ते द्वयङ्गुलकं तथा च सप्तविंशतिहस्तत: पञ्चाशद्धस्तस्य पीठोदयमानमेकाङ्गुलं प्रवर्ध्य

एकहस्तविस्तृतस्य पीठोदयमानम् आहत्य त्रयस्त्रिंशदङ्गुलकमथ च द्विहस्तविस्तृतस्य प्रासादस्य पञ्चपञ्चाशत् पीठोदयमानम्

त्रिहस्तविस्तृप्रासादस्य पीठोदयमानं सप्तसप्तत्यङ्गुलकं भवेत् चतुर्हस्तविस्तृप्रासादस्य नवनवत्यङ्गुलकं भवेत्

**गर्भगृहविधानम्-** शास्त्रेषु देवालयनिर्माणावसरे गर्भगृहवैशिष्ट्यं द्योतितम्। गर्भगृहमानविचारे मयमतमत्र ध्येयम् । अस्य मते गर्भगृहप्रमाणं मन्दिरप्रमाणस्य भागत्रये भागैक:, भागपञ्चके त्रिभागा:, भागसप्तके चतुर्भागा:, भागनवके पञ्च, एकादशे षड्, त्रयोदशभागे सप्त, पञ्चदशसु अष्टौ सप्तदशभागेषु नवभागा: भवेयु:।

अन्यग्रन्थकारमते प्रासादस्य गर्भगृहद्वारमानाय समक्षेत्रस्य दशभागः कर्तव्यः। पुनः भित्तेः चतुर्भागाः कर्तव्याः शेषषड्भागस्य गर्भगृहनिर्माणं कार्यम्।

अन्यग्रन्थकारमते देवालगर्भगृहं चतुरस्राकारं निर्मितव्यम्। अत्र भद्रसुभद्रप्रतिभद्राणां रचना फालनीयस्थाने कर्तव्या । गर्भगृहम् आयताकारं भवति तदा दोषो भवति।

गर्भगृहोदयमानस्यापि स्पष्टीकरणं कृतं वर्तते। ग्रन्थकारमते देवालयगर्भगृहस्य विस्तारः तावद्भवेत् यावद्विस्तारस्य षष्ठांशः स्यादथवा सार्धैकांशेन षष्ठांशः विनियोजितः भवेत्। प्रासादगर्भगृहस्य उदयमानं गर्भगृहस्य तलात् पट्टस्य पेटान्तं यावत् त्रिप्रकारकं भवति। अतः परं लब्धोदयमानमष्टभागात् विभक्तव्यम्। भागेषु एतेषु भागैकस्य कुम्भी, सार्धपञ्चभागस्य स्तम्भनिर्माणम्, अर्धस्य भरणी, एकस्य शीर्ष्णः एतदुपरि सार्धैकभागस्य पट्टः अथवा केवालः निर्मातव्यः। एवमेव करोटस्य गुम्बजस्य उदयमानं गर्भगृहस्य विस्तरादर्धं स्यात्। अथास्यां दर्दर्याः थरस्य संख्या 3, 5, 7, 9, 11 विषमा भवेत्

**सन्दर्भाः** -

यस्तु प्रासादमुख्योऽत्र विहितः सर्वशिल्पिभिः।
अतीव रम्यः सोऽप्यत्र प्रहसन्निव तिष्ठति।।
तदूर्ध्वं नवहस्तान्तं पूजनीया सुरालये।
दशहस्तादिती या आवां प्रसादेन विनाऽर्चयेत्।।
कृत्वा प्रभूतं सलिलमारामान् विनिवेश्य च।
देवायतनं कुर्याद्यशोधर्माभिवृद्धये।। (बृहत्संहिता 56, 1)
इष्टापूर्तेन लभ्यन्ते ये लोकास्तान् बुभूषता।
देवानामालयः कार्यो द्वयमप्यत्र दृश्यते।। (बृहत्संहिता 56, 2)
इष्टं यज्ञेषु यद्दानं ततोऽन्यत्पूर्तमिष्यते।
इष्टाभिः पशुबन्धैश्च चातुर्मास्यैर्यजेद्द्विजः।।
अग्निष्टोमादिभिर्यज्ञैर्यो यजेत स इष्टवान्।
वापीकूपतडागादि देवायतनानि च।।
अन्नप्रदानमाचार्यैः पूर्त इत्यभिधीयते।। (बृहत्संहिता 56, 2, भटोत्पलीयविवृत्तिः)
इष्टापूर्तादिभिर्यज्ञैर्यावत्कुर्वन्ति मानवाः।
अग्निष्टोमादिपशुभिरिष्टिं यज्ञं प्रकीर्तितम्।।
वापी-कूप-तडागादि देवायतनानि च।
स्वर्गस्थितिं सदा कुर्यात्तद्दानं पूर्तसंज्ञितम्।।
देवानामालयः कार्यो द्वयमप्यत्र लभ्यते।। (बृहत्संहिता 56, 2, भटोत्पलीयविवृत्तिः)
शेषं मङ्गल्यविहगैः श्रीवृक्षैः स्वस्तिकैर्घटैः।
मिथुनैः पत्रवल्लीभिः प्रमथैश्चोपशोभयेत्।। (बृहत्संहिता 56, 15)
श्रीवत्स-स्वास्तिकपूर्णकलशत्रिरत्नश्चक्राः।
मीनमिथुनादर्पणपद्मशङ्खश्चांकुशार्क च।।

चन्द्रनागाश्च माल्यच्छत्रवृक्षपंचागुलांकम्।
इत्यमपि मांगलिकचिह्वाः कथयति बुधजनाः।। (चित्रलक्षणम्, पृष्ठ 48)
शेषं मङ्गल्यविहगैः श्रीवृक्षैः स्वस्तिकैर्घटैः।
मिथुनैः पत्रवल्लीभिः प्रमथैश्चोपशोभयेत्।। (बृहत्संहिता 56, 15)
मेरूमन्दरकैलासविमानच्छन्दनन्दनाः।
समुद्रपद्मगरूडनन्दिवर्धनकुञ्जराः।।
गुहराजो वृषो हंसः सर्वतोभद्रको घटः।
सिंहो वृत्तश्चतुष्कोणः षोडशाष्टाश्रयस्तथा।।
इत्येते विंशतिः प्रोक्ताः प्रासादाः सञ्ज्ञया मया।। बृहत्संहिता 56, 17-19
कपोतपालिरहितं मानं चतुरशीतिकम्।
भूमिकानां सह तया शतमष्टोत्तरं स्मृतम्।
अङ्गुलानामतः साम्यं भूमिकासु प्रकीर्तितम्।।
प्रासादो देवरूपः स्यात् पादौ पादशिलास्तथा।
गर्भश्चैवोदरं ज्ञेयं जङ्घा पादोर्ध्वमुच्यते।।
स्तम्भाश्च जानवो ज्ञेया घण्टा जिह्वा प्रकीर्तिता।
दीपः प्राणः रूपो ज्ञेया ह्यपाने जलनिर्गतः।।
ब्रह्मस्थानं यदैतच्च तन्नाभिः परिकीर्तिता।
हृदयं पीठिका ज्ञेया प्रतिमा पुरुषः स्मृतः।।
पादचारस्त्वहङ्कारो ज्योतिस्तच्चक्षुरुच्यते।
तदूर्ध्वं प्रकृतिस्तस्य प्रतिमात्मा स्मृतो बुधैः।।
तलकुम्भादधोद्वारं तस्य प्रजननं स्मृतम्।
शुकनासा भवेन्नासा गवाक्षः कर्ण उच्यते।।
पीठमर्द्धं त्रिपादांशैरेकद्वित्रिकरे गुहे। चतुर्हस्ते त्रिसार्धांशं पादांशं पञ्चहस्तके।। प्रा.म. 3⁄5
दशविंशति षट्त्रिंशत् शतार्द्धं हस्तकावधिः। वृद्धिर्वेदत्रियुग्मैकसंख्या स्यादङ्गुलैः क्रमात्।।
पञ्चांशहीनमाधिक्यमेकैकं तु त्रिधा पुनः।।
एकहस्ते तु प्रासादे त्रयस्त्रिंशद्भिरङ्गुलैः। द्विहस्ते तु प्रकर्तव्यः पञ्चपञ्चाशदङ्गुलैः।। अ.पृ. 123/1
हर्म्यतारत्रिभागैकं भूतांशेषु गुणांशकम्।धातुभागे युगांशः स्याद्बाणांशं नवभागिके।।
रुद्रांशे रसभागं तु धातु त्रयोदशांशके। तिथ्यंशे वसुभागं तु सप्तदश नवांशकम्।।
विस्तारार्धं तु ते सर्वे नालीगृहविशालता।।म.म.19/13-15
मध्ये युगास्त्रं भद्राढ्यं सुभद्रं प्रतिभद्रकम्। फालनीयं गर्भगृहं दोषदं गर्भमायतम्।। प्रा. म. 3/32
अर्धेन भरणी शीर्षमेकं पट्टस्तु सार्धकम्। व्यासार्द्धेन करोटं स्याद्दर्यो विषमा शुभा।। तत्रैव 3/36

**सन्दर्भग्रन्थानां सूची**


1. देवप्रासादवास्तु विज्ञानम्, ले0/डा.बिहारी लाल शर्मा, संस्करणम्- 2015, भारतीय बुक कार्पोरेशन दिल्ली
2. देवालयस्थापत्यम्, डा0 देशबन्धु, सन्-2015 ई0, श्रीकृष्णसाहित्यसदन नई दिल्ली
3. देवतामूर्तिप्रकरणम्, सम्पा0/डा. श्रीकृष्ण जुगनू, सन्- 2003, न्यूभारतीयबुककोरपोरेशन चन्द्रावल-नईदिल्ली
4. देवीभागवत महापुराणम्, महर्षिवेदव्यासप्रणीत, व्याख्याकार/ राधेश्यामखेमका, वि0सं0-2070 गीताप्रेस गोरखपुर
5. नारदसंहिता, महामुनिनारदकृत, सम्पा0/ रामजन्ममिश्र, चतुर्थसंस्करणसन्-2001, चौखम्भा संस्कृतसंस्थान-वाराणसी
6. प्रासादमण्डनम्, सम्पा0/व्या0/डा.श्रीकृष्ण जुगनू, प्रथमसंस्करणम्-2005, परिमल पब्लिकेशन्स दिल्ली
7. प्राचीन भारतीय पुरनिवेश, डा0 विद्याधर, प्रथमसंस्करणम्-2010, ईस्टर्न बुक लिंकर्स दिल्ली
8. प्राचीन भारतीय स्तूप गुहा एवं मन्दिर, ले0/ डा.वासुदेव उपाध्याय, चतुर्थसंस्करणम्-2008
9. विहार हिन्दीग्रन्थ अकादमी पटना, बृहद्वास्तुमाला, सम्पा0/ब्रह्मानन्द त्रिपाठी, सन्- 1998 चौखम्भासुरभारतीवाराणसी
10. बृहत्संहिता, सम्पा0/सुधाकरद्विवेदी, संस्करणम्- 1996 ई0, सम्पूर्णानन्द संस्कृतविश्व- विद्यालय,बनारस
11. भारतीय वास्तुविद्या के वैज्ञानिक आधार, ले0/ डा.बिहारीलाल शर्मा, प्रथमसंस्करणम्-2004 मान्यता प्रकाशन दिल्ली
12. मनुस्मृति, मन्वर्थमुक्तावलीटीकासहितेन व्या0/पं0हरगोविन्दशास्त्री, तृतीयसंस्करणम् वि0 सं0-2039, चौखम्भा संकृत संस्थान वाराणसी
13. मयमतम्, हिन्दी टीका0/डा. शैलजा पाण्डेय, संस्करणम्-2018, चौखम्भा सुरभारती प्रकाशनवाराणसी